श्री भविष्योत्तर पुराणे रक्षोभुवन महात्म्ये शनैश्चरविरचित श्रीनृसिंहस्तुति: ॥

श्री भविष्योत्तर पुराणे रक्षोभुवन महात्म्ये शनैश्चरविरचित श्रीनृसिंहस्तुति: ॥

श्री कृष्ण उवाच -
सुलभो भक्ति युक्तानां दुर्दर्शो दुष्ट चेतसां ।
अनन्य गतिकानां च प्रभुर्भक्तैकवत्सल: ॥ १ ॥
शनैश्चर तत्र नृसिंहदेव स्तुतिं चकारामलचित्तवृत्ति: ।
प्रणम्य साष्टांगमशेष लोककिरीट नीराजित पादपद्मं ॥ २ ॥

श्री शनिरुवाच
यत्पादपंकजरज परमादरेण
संसेवितं सकल कल्मषराशिनाशं ।
कल्याण कारकमशेषनिजानुगानं ।
सत्वं नृसिंह मयि देहि कृपावलोकं ॥३॥

सर्वत्र चंचलतया स्थितयापि लक्ष्म्या।
ब्रह्मादिवंद्यपदया स्थिरयान्यसेवि ॥
पादारविंदयुगलं परमादरेण ।
सत्वं नृसिंह मयि देहि कृपावलोकं ॥४॥

यद्रूपमागमशिर: प्रतिपाद्यमाद्य-
माध्यात्मिकादि परितापहरं विचिंत्यं ।
यॊगेश्वरैरपगताऽखिल दोष संघै: ।
सत्वं नृसिंह मयि देहि कृपावलोकं॥५॥

प्रह्लाद भक्त वचसा हरिराविरासी ।
स्तंभे हिरण्यकशिपुं य उदारभाव: ॥
उर्वोर्निधाय तदुदरो नखारैर्दधार ।

सत्वं नृसिंह मयि देहि कृपावलोकं ॥६॥

यो नैजभक्तमनलांबुधि भूधरोग्रशृंगप्रपात विशधंति सरीसृपेभ्य:।
सर्वात्मक: परमकारुणिको ररक्ष सत्वं नृसिंह मयि देहि कृपावलोकं ॥७॥

यन्निर्विकार पररूप विचिंतनेन योगीश्वरा विषयवीत समस्तरागा: ।
विश्रांतिमापुरविनाशवतीं पराख्यां सत्वं नृसिंह मयि देहि कृपावलोकं ॥८॥

यद्रूपमुग्र परिमर्दनभावशालि संचिंतनेन सकलाघविनाशकारि ।
भूतज्वरग्रह समुद्भव भीतिनाशं ।सत्वं नृसिंह मयि देहि कृपावलोकं ॥९॥

यस्योत्तमं यश: उमापतिपद्मजन्मशक्रादि दैवत सभासु समस्तगीतं ।
शक्तैव सर्वशमल प्रशमैकदक्षं सत्वं नृसिंह मयि देहि कृपावलोकं॥१०॥

एवं श्रुत्वा स्तुतिं देव: शनिनां कल्पितां हरि: ।
उवाच ब्रह्मवंद्यस्तं शनिं तं भक्तवत्सल: ॥११॥

श्री नृसिंह उवाच
प्रसन्नोऽहं शने तुभ्यं वरं वरय शोभनं ।
यं वांचसि तमेव त्वं सर्वलोक हितावहं ॥१२॥

श्री शनिरुवाच
नृसिंह त्वं मयि कृपां कुरु देव दयानिधे ।
मद्वासरस्तव प्रीतिकर: स्याद्देवतापते ॥१३॥

मत्कृतं त्वत्परं स्तोत्रं शृण्वंति च पठंति च ।
सर्वान् कामन् पूरयेथा: तेषां त्वं लोकभावन ॥१४॥

श्री भविष्योत्तर पुराणे रक्षोभुवन महात्म्ये शनैश्चरविरचित श्रीनृसिंहस्तुति: ॥

श्री नृसिंह उवाच
तथैवास्तु शनेऽहं वै रक्षोभुवन संस्थित: ।
भक्तकामान् पूरयिष्ये त्वं ममैकं वच: शृणु ॥१५॥

त्वत्कृतं मत्परं स्तोत्रं य: पटेत् शृणुयाच्च य: ।
द्वादशाष्टम जन्मस्थात् त्वद्भयं मास्तु तस्य वै ॥१६॥

शनिर्नरहरिं देवं ततेति प्रत्युवाच ह।
तत: परमसंतुष्टा: जयेति मुनयोवदन् ॥१७॥

श्री कृष्ण उवाच
इत्थं शनैश्चरस्याथ नृसिंहदेव संवादं ।
एतत् स्तवनं च मानव: ।
शृणोति य: श्रावयते च भक्त्या
सर्वान्यभीष्टानि च विंदते ध्रुवं॥१८॥

इति श्रीभविष्योत्तर पुराणे रक्षोभुवन महात्मे श्रीशनैश्चरकृत श्रीनृसिंह स्तोत्रं संपूर्ण॥

॥ श्रीकृष्णार्पणमस्तु ॥